# ३. तृतीयोऽध्यायः (आलोच्यप्रकरणत्रयस्य परिचयः)

(१) ज्ञानभास्करग्रन्थकर्ता विषयश्च

(२) ज्ञानभास्करोक्त प्रकरणानि

(३) स्वीकृतस्य प्रकरणत्रयस्य परिचयः

## (1) ज्ञानभास्करग्रन्थक र्त्ता विषयश्च

ज्योतिषशास्त्रस्य अनेकेग्रन्था: एतादृशा: सन्ति येषांनामानि प्रायेण समानार्थका: सन्ति। यथा - सौरसंहिता, सौरसिद्धान्त, ज्योतिषभास्कर:, भास्करतत्वम्, ज्ञानभास्कर: सूर्यारूण, ज्योतिषसिद्धान्तादय: । अत्र प्रश्न: उदेतियत् एकस्यशास्त्रस्य एनेकाशाखाग्रन्था: भवन्तेव तर्हि ज्योतिष विषये सादृशनामानि कथं करणानि सन्ति। तत्रोच्येते यदाग्रन्थकारै: यस्यकस्याऽपि ग्रन्थस्य रचना क्रियते तदा स्वरचितग्रन्थस्य वैशिष्ठ्यख्यापनाय पूर्वाचार्यवत् परम्पराधारेण ग्रन्थनाम क्रियते। तद्वदत्राऽपि चतुर्लक्षश्लोकात्मक ज्योतिषशास्त्रस्य भिन्न-भिन्न कालेषु पृथक-पृथक ग्रन्थकारेण तत् शास्त्रस्य सारमुत्धृत्य विषयवस्तुनां विवेचनं क्रियते।

अयं ज्ञानभास्करोऽपि तत्परमपराया एव ग्रन्थ: प्रतीयते।

ग्रन्थकार:

ज्ञानभास्करनामकस्य पुस्तकस्य स्वरूपम् हस्तलिखितरूपेण प्राप्यते। अस्य नामकस्य नैक: हस्तलिखित प्रतय: उपलब्धा सन्ति। काचिद् पूर्णा, काचिद् खण्डिता, काचिच्च पुन: हस्तलिखिता च वर्तन्ते। यासु प्रतिषु ग्रन्थकार रूपेण हस्तलेखस्यैव नाम प्राप्यते। तेन सर्वत्र एवं उल्लेख: क्रियते।

इती ज्ञानभास्करेहोरासारग्रंथ सम्पूर्णम्।। शुभं भवतु सम्वत् १६४० वर्षे चैत्रमासे कृष्णपक्षे द्वितीयां तिथौ चन्द्रवासरे इदं कर्मवियाकपठनार्थं भट्ट श्री नारायणदाश ब्राह्मणेस्य ब्राह्मु परमानंदेन लिखितम्।। श्रीमंत गायकवाड सरकार च संस्कृत पुस्तकालयस्य ग्रंथावरून रामचंद्र यशवंत मराठे याणीही प्रतीस्वार्थपरार्थालहिली मुकाम वडोदे मिती भाद्रपद शुक्ल ७ मंदवासरे प्रथमचार घटिका रात्री समाप्त शके १८..शोभननाम संवत्सरे संम्वत् १९४० विक्रमार्क तारीख ८सेप्टेम्बर सन् १८८३ इश्वी।। श्रीरस्तु।।

।। श्री सीतारामचंन्द्रचरणानिवेदितम्।।

३१४० ज्ञानभास्कर

इति श्री सौरे ज्ञानभास्करे प्रमादे नानाविध लघुफलहरणोत्पन्न कैब्यकर्मप्रकाश: ।। श्री।। सं. १६४६ वा प्रथम भाद्र पदशुदि १२ भौमेऽद्येह श्री महीनर्मदयोर्मध्ये श्री वटपदे श्री आभ्यंतर नागर ज्ञातीय दवे भूधरं सुत विष्णुजी केन

लिखितम्। । श्री संगमतीर्थे श्री महीसागर संगमोत्तरे श्री उदीच्यज्ञातीय पंड्या हरिदत्तभ्रातृ पंड्या रविदत्त पष्ठनार्थं तथापरोपकाराय लेखक पाठकयोः शुभं भवतु।। श्री ।।६।। श्री कल्याणी।।

२०३९ ज्ञानभास्कर

इतिकमदीप विपाके शिोवमा संवादे सूर्यारूण संवादे शिव सौरगणित शास्त्रे चतुर्लक्षाणां ज्योतिः सारे भवन होराप्रदीपे द्वादश भवनफलं समाप्तम्। सम्वत् १९१२शके १७७७

३०८० ज्ञानभास्कर

सम्वत् १७८५ शाके १४५० जगन्नाथात्मजेन लघवेन परोपकरार्थं लिखितम्।

इति एतद् अवगत्य ज्ञायते यत् कालानुसारेण हस्तलिखित लेखकस्यनाम एव अवशिष्टम्। मूललेखकस्य अद्यावधि नाम्नैव स्मृंतम्। स्वख्याति ख्यापनाय लेखकानां पौनः पुण्येन कालान्तरे परिवर्तनम् कारितम्।

ग्रन्थोऽयं निश्चित् रूपेण सौरसिद्धान्तस्य अवशिष्ठ खण्डः प्रतीयते। यत्रकुत्राऽपि अनेकानि प्रकरणानि प्राप्तानि भवन्ति। किन्तु यस्मिन् कस्मिन् ज्ञान भास्करे खण्डद्वयम् खण्डत्रयम्, प्रकीर्णद्वयम्, प्रकीर्ण पञ्चकं च प्राप्यन्ते। अनेन कारणेन असंदिग्धरूपेण कस्याऽपि नामनोधृयते तथाऽपि ग्रन्थस्य विषये विषये यथा ज्योतिषस्य फलादेशविषये होराविषये षड्वर्गविषये, कर्मविपाकफलविषये च नास्ति सन्देहलेश यत् पूर्वाचार्यैः परम्परया उपासनया च यज्ज्योतिषस्य परमं रहस्यं फलं तत्वं च यत्रकुत्राऽपि उद्घाटितम् तदेव अयं ज्ञानभास्करः। यतो हि पर्वे उक्तम्

सूर्यः पितामहो व्यासो वसिष्ठोऽत्रि) पराशरः।<br>
कश्यपो नारदो गर्गो मरीचिर्मनुरङ्गिराः।।<br>
रोमशः पौलिशश्चैव च्यवनो यवनो भृगुः।<br>
शौनकोऽष्टा दशाश्चेते ज्योतिः शास्त्रप्रवर्तकाः।। इति।

अनेन ज्ञायते यथानेकास्त्राणां विषये परम्पराया सम्प्रति प्राप्तग्रन्थानां पुस्तकानां च सन्देहावसार उपलभ्यते तदत्राऽपि ध्यातव्यं इति।

अस्यवर्णित विषया:

मया अवलोकितम् एतन्नाकमम् हस्तलिखित पुस्तकम् तस्य संख्या सप्त सनित। एतेषु चत्वारग्रन्था: छिन्नभिन्ना: सन्ति। किन्तु त्रिणि पुस्तकानि पठितव्यानि सन्ति। तत्र केके सन्दर्भा: ज्योतिषविषयका: तेषां अध्यायान्तरे प्रस्तूयते मया।

# अध्याय ३

## २. ज्ञानभास्करोक्त प्रकरणानि -

ज्ञानभास्करनामके अनेकेग्रन्था: हस्तलिखितरूपेण प्राप्यन्ते। वटोदरस्य प्राच्यविद्यामन्दिरे जीर्णा अपूर्णा ज्ञानभास्कर नामका: सप्तग्रन्था: वर्तन्ते।

तत्राधिकांशग्रन्था: सूर्यारुणसंवादरूपेण वर्तन्ते। वटोदर प्राच्यविद्यामन्दिरे (Original) यानि पुस्तकानि सन्ति तेषां विवरणमयोध्रीयते -

१. सम्प्राप्तेषुसप्तग्रन्थेषु मध्ये प्रथमो हि - ५३७२

क) ग्रन्थोयं हस्तलिखितरूपेण वर्तते।

ख) अस्यपुस्कस्य प्राच्यविद्यामन्दिरे पुस्तक क्रमांक: ५३७२ अस्ति। अस्मिन् ग्रन्थे ४२ (द्वाचत्वारिंशत्) पृष्ठानि सन्ति।

ग) अत्र सार्धत्रिशतम् (३५०) परिमितं श्लोकसंख्या: सन्ति।

घ) ग्रन्थोयं कर्मविपाक फलकथनरूपेण वर्तते। तत्र पूर्वजन्मस्य कर्मानुसारेण इहजन्मनिबन्ध्यत्वादि एवं लग्नादिनां वर्णनं वर्तते। तत्रादौ प्रथमश्लोके -

मेष लग्नेन्तवंधावत् प्रच्छकस्य हि कर्मकारणम्। इत: प्रारभ्य अरुण द्वारा पूर्वजन्मफलकथनम् इत्यादिकं वर्णनं अस्ति।

**"किं कर्म प्रच्छकस्यैव किं पापेन कर्मणि।**
**शरीरे लक्षणं कं च कथयस्वदिवाकर:।।"**

इति श्लोकेन स्पष्टं भवति, यत् पूर्वजन्मस्य पुण्यपापानुसारेण शरीरलक्षणादि वर्णनं ग्रन्थे..स्मिन् वर्तते। तत्रैव जन्मलग्नानुसारेण पूर्वजन्मस्य विप्रादिवर्णज्ञानं भावस्थित ग्रहानुसारेण भ्रातृभगिन्यादिनां संख्याज्ञानं सहोदरादीनां शस्त्रघातादिज्ञानं वर्णितम्।

ग्रन्थे..स्मिन् द्वादशलग्नस्थित आदित्यादि ग्रहाणां फलकथनं तथा च पूर्वजन्मस्य दोषानाय तथा च प्रायश्चित्यादीनां वर्णितम्। तत्रैव लग्नचक्रानुसारेण तथा च पूर्वजन्मस्य ज्ञानं भविष्यादिज्ञानंच ज्ञातुं शक्यते। यथा-

वृषभलग्ने यदि प्रथम, दशम, त्रिकोण स्थाने राहुभौमश्च युति चेत् तदा सन्तानोत्पत्ति
एवं भाग्योदयस्यकृते सः एव।

वृषलग्ने गुरुशुक्रयोः यतिचेत् चन्द्रः मित्रगृही चेत् तदा स्त्री हानिकारकोभवति। एवमेवप्रकारेण पूर्वजन्मस्य ज्ञानं तथा च धन, पुत्र, रोगादिनां वर्णनं अस्यग्रन्थेस्य वैशिष्ट्यम् इति।

**२. द्वितीयः ज्ञानभास्करः (२०३९) -**

ग्रन्थो..यं हस्तलिखितः वर्तते। अस्मिन् ग्रन्थे ८८ पृष्ठसंख्या वर्तते। अस्य निर्माणं सम्वत् १९१२ शाके ९६९६ फाल्गुन शुक्ल षष्ठी बुधवासरे जातम्।

**अस्य ग्रन्थस्य लेखकः -**

भदजीरामरत्नस्यनामको आत्मजः ग्रन्थलेखकः सूच्यते।

**अत्र वर्णित विषयः -**

१००० श्लोकात्मक ग्रन्थो..यं सूयार्कण संवादरूपेण वर्तते। ग्रन्थेस्मिन् प्रथमध्याये पञ्चत्रिंशत् श्लोकाः वर्तन्ते। अस्य ग्रन्थस्य द्वितीयोध्यायः, लग्नशुद्धिः वर्तते। तत्र शुद्ध लग्न ज्ञानार्थे जन्मनक्षत्र वर्णादि ज्ञानं च वर्तते। तत्र पूर्वजन्मस्य जन्मभूम्यादिज्ञानमपि वर्णितम्। यथा-

**मेषे कर्णाटके भूमि वृषे जन्म विराटके।**

इत्यादि लग्नात् पूर्वजन्मस्य जन्मभूम्यादि वर्णितम्। तत्रैव जन्मलग्नात् पूर्वजन्मस्य ब्राह्मणादि वर्णज्ञानं, ववादि करणात् स्त्रीकर्मविचारः वर्णितम्।

ग्रन्थे..स्मिन रोगविषयकं मृत्युकारणं च सम्यक् वर्णनमीति।

लग्नात् षष्ठाष्ठस्थाने भौमचन्द्रस्तः तदा विषकारणात्, सिंहविदारणात् मृत्युः, रथकारणाद्वा जायते।

**पञ्चमेतु यदा सूर्य सौरीशुक्रोथवागुरुः ।**
**तदा गुह्ये प्रमेहं च कुर्वत्येव न संशयः।।४१।।**

**एकादशे स्थिते सूर्ये पञ्चमे च शनिर्भवेत्।।**

**अष्टमे च स्थितेक्रूरे क्षयरोगस्य सम्भवः।।५५।।**

एवमेव प्रकारेण पञ्चमस्थानस्थित ग्रहात् पुत्रकन्यादि संख्या ज्ञानम् लग्नात् पिता-प्रपिता, मातामह, प्रमातामहादिना, ज्ञानम् अत्रैव वर्णितम्। इत्यादिदोषज्ञानाध्यायास्ते तन्वादि द्वादश भावानां फलकथनं वर्तते। अत्र तन्वादिद्वादश भावानां सूर्यादिग्रहस्य फलकथनं वर्तते।

**ज्योतिषे अस्य ग्रन्थस्य वैशिष्ट्यम् -**

द्वादशभावानां पर्यायः, माता, मातामहादिनां ज्ञानं, ग्रामनगरादि सौख्यं, भावेषु अनेकग्रहाणां युतिफलं च वर्णितम्।

इति विषयान् वर्णितमिति।

**३. तृतीयो ज्ञानभास्करः (३१३९) -**

क) अस्यपुस्तकस्य प्राच्यविद्यामन्दिरे ३१३९ पुस्तक क्रमांकः अस्ति।

ख) अस्मिन् ग्रन्थे चतुर्दशपृष्ठानि सन्ति।

घ) १२० श्लोकात्मको ग्रन्थे..स्मिन् षड्वर्गस्य फलकथनम् उद्घाटितम्।

च) अस्यग्रन्थस्य विवेचनम् शोधप्रबन्धे षडवर्गरूपेण स्वीकृतमेति।

छ) अस्यग्रन्थस्य लेखकः तथा च लेखनकालविषये किमपि नववर्णितम्।

**४. चतुर्थो ज्ञानभास्करः (३१४०) -**

हस्तलिखितग्रन्थे..स्मिन् २८ पृष्ठसंख्या वर्तते। अस्य ग्रन्थस्य निर्माणं सम्वत् १६६४ तमे जातम्।

**अस्यग्रन्थलेखकः -**

महीनर्मदयोर्मध्ये श्री वटपद्रेश्री आभ्यंतरनागर ज्ञातीय दवे भूधरंसुतश्री विष्णुजीकेन लिखितम्।

पुनः

श्री.... तीर्थे श्री महीसागरसंगमोत्तरे श्री उदीच्यज्ञातीय पंड्या हरिदत्तेन।

वर्णितविषयः -

अस्मिन् ग्रन्थे ज्ञानभास्करोक्तान्येकानि प्रकरणानि मध्ये सौरसिद्धान्ते "क्लैव्यकर्मप्रकाश" नामके सन्दर्भे पुस्तकेवा वर्णनमीति।

अस्मिन् हस्तलिखित प्रति ३०० श्लोकाः वर्तते। तत्र पूर्वजन्मस्य कर्मानुसारेण इहजन्मनी क्लैव्यादि वर्णनं अस्ति। हस्तलिखिताक्षरेषु सन्देहावसराः बहुविधाः भवति। अतएव अस्यष्टाक्षरच्युति दोषसहिताप्रतिरिममिति।

**५. पञ्चमोज्ञानभास्करः (३३८०) -**

ग्रन्थोयं हस्तलिखितः वर्तते। अस्मिन् ग्रन्थे ३२० पृष्ठसंख्यावर्तते। अत्र ४००० श्लोक संख्या वर्तते।

प्राच्यविद्यामन्दिरे वटोदरे प्राप्तः ज्ञानभास्करनामकः ग्रन्थानां सर्वप्राचीनहस्तलिखितः वृहदाकारकः ग्रन्थः अयं वर्तते। अस्यग्रन्थस्य निर्माणं सम्वत् १५८५ वर्णितम्। अस्मिन् ग्रन्थे अनेकाधिकाराः वर्तन्ते। अस्य ग्रन्थः नष्ट प्रायेणस्ति।
अस्मिन् ग्रन्थे प्रमुखरूपेण, प्रमेहाधिकारः, मूत्रकृच्छाधिकारः, अतिसाराधिकारः, ग्रहिष्याधिकारः, अर्शाधिकारः, गुदरोगाधिकारः, श्वासाधिकारः, अपस्माराविकारेः, उदरविकारः, गर्भपातोत्पन्न, नानाभूतप्रहारोत्पन्न।, प्लीहोदर, गुरुजायाः, गुल्माधिकारः, वर्णाधिकारादिः इत्यादयः।

अस्य ग्रन्थस्य यमुदराधिकारान्ते लेखक विषये वर्णितम् यत् - "शाके १४५०, जगन्नाथात्मजेन लघवे परोपकाराय" अयं ग्रन्थः लिखितम्।

**६. षष्ठज्ञानभास्करः (३१३८) -**

क) ग्रन्थोयं हस्तलिखितः वर्तते।
ख) अस्यपुस्तकस्य वटोदर प्राच्यविद्यामन्दिरे पुस्तक क्रमांकः ३१३८ अस्ति।
ग) अस्मिन् ग्रन्थे ४२ (२१X२) पृष्ठानि सन्ति।
घ) अत्र ४०० परिमित श्लोकसंख्याः सन्ति।
च) अस्यग्रन्थस्य रचनाकाल एवं लेखकस्य विवरणं अप्राप्तं वर्तते।
छ) लग्नस्पष्टतः (प्रश्न) आरभ्य द्वादशलग्नानां फलकथनं अत्र वर्णितम्।

**७. सप्तमः ज्ञानभास्करः (१२३११b) -**

क) अस्यग्रन्थस्य प्रच्यविद्यामन्दिरे पुस्तक क्रमांकः (१२३११b) वर्तते।

ख) अस्मिन् ग्रन्थे १३२ पृष्ठानि सन्ति।

ग) अत्र ६०० परिमित श्लोक संख्याः सन्ति।

**७. सप्तमः ज्ञानभास्करः (१२३११b) -**

क) अस्यग्रन्थस्य प्रच्यविद्यामन्दिरे पुस्तक क्रमांकः (१२३११b) वर्तते।

ख) अस्मिन् ग्रन्थे १३२ पृष्ठानि सन्ति।

ग) अत्र ६०० परिमित श्लोक संख्याः सन्ति।

घ) अस्मिन् ग्रन्थे प्रकरणत्रयम् वर्तन्ते। तत्र

-षड्वर्गफलकथनम्

-होरासारेकर्मविपाकादिफलम्।

-क्लैव्यकर्मप्रकाश।

**३. स्वीकृतप्रकरणत्रयस्य परिचयः -**

अस्य अध्यायस्य द्वितीये शीर्षके "ज्ञानभास्करोक्त प्रकरणानि" नामके सन्दर्भे सप्तप्रकरणानि निर्दिष्टानि।

तत्र षष्ठज्ञानभास्करतः द्वादशलग्नानां फलकथनम्, सप्तम् ज्ञानभास्करतः १) षड्वर्गफल कथनम् २) होरासारे कर्मविपाकादि फलं च। एवमाहत्यं प्रकरणत्रयम् स्वीकृतं अनुसन्धानायेति।

**एतेषां प्रकरणानां अत्रपरिचयः प्रदीयते -**

**१. षड्वर्गफलम् -**

सप्तमज्ञानभास्करे षड्वर्गफलम् अतीव वैशिष्ट्ययुतं वर्तते। यतो हि सर्वेषु ज्योतिष ग्रन्थेषु षड्वर्ग वर्णनं प्राप्यते तथा..पि अस्मिन् ज्ञानभास्करोक्ते षड्वर्गे विशिष्ट फलम् ग्रन्थकारेण लिखितम्। अस्मिन् प्रकरणे ८४ चतुसीति परिमिता श्लोकाः सन्ति। अत्र होरातः आरभ्य त्रिशांश पर्यन्तम् फलादिकथनं कृतमिति। लिखितेभ्यः श्लोकेभ्यः प्रारम्भः तः द्वित्रि अनुषटुप छन्दसि वर्तन्ते। ततः आर्याछन्द प्रयोगः कृतः ग्रन्थकारेण,

अस्मिन् प्रकरणे आहत्य प्रायेण चतुः पञ्चसह छन्दप्रयोगः दृश्यते। यथा अनुष्टुप्, आर्या, वसन्ततिलकः, उपेन्द्रव्रजा, इन्द्रवज्रास्य।अस्मिन् प्रकरणे आहत्य प्रायेण चतुः पञ्चसह छन्दप्रयोगः दृश्यते। यथा अनुष्टुप्, आर्या, वसन्ततिलकः, उपेन्द्रव्रजा, इन्द्रवज्रास्य।

**भाषाः -**

अस्मिन्प्रकरणे अतीवसरला स्पष्टा च अस्ति। प्रसिद्धा शब्दानां संयोजनं वर्तते। यत्रकुत्रा..पि व्याकरण दृष्ट्याखलनं दृश्यते तथा..पि पारम्पर्या लेखनकार्ये स्वाभाविकरीत्यायाः त्रुट्याः भवेयुः तासामपि दर्शनं भवति।

**फलकथनम् -**

पाराशरादिनां तद्वर्तिनां दैवज्ञानां पुस्तकेषु यानिफलानि षड्वर्गस्य कथितानि तेषामपि फलं स्वीकृत्य यत्किञ्चित् विशिष्ट्यमपि संयोजितम्। अनेन कारणेन अस्य षड्वर्गस्य ज्योतिषे अपरिहार्यमध्यनं भवेदिति।

**२. होराशास्त्रेकर्मविपाकादिफलम् -**

द्वितीय प्रकरणरूपेण इदं प्रकरणं स्वीकृतमिति। ज्ञानभास्करे प्रकरणमिदम् पुनर्लेखनरूपेण १९वीं शताब्द्यां हस्तलिखित रूपेण कृतमिति।

अत्र २७८ अष्टसप्तत्युत्तर सतद्वयं श्लोके संख्या वर्तते। अत्र प्रायेण सम्पूर्ण प्रकरणे सूर्यारूण संवादरूपेण प्रकटितम्।

**छन्दप्रयोगः -**

सम्पूर्ण प्रकरणे प्रायेण द्वित्री प्रकारकानि छन्दांसि प्रयुक्तानि इति। यथा अनुरूप आर्या इन्द्रव्रजादीनि च ।

**भाषा -**

भाषा दृष्ट्या व्याकृतिदोष खलिता भाषा दृश्यते लेखनेपि लेखक प्रयुक्त शब्दावलिषु अनेकेषु स्थलेषु भ्रान्तिरपि भवेत्। किन्तु ज्योतिष अध्येतृणांकृते नैवदुस्करमिदम्।

**विषयवस्तु -**

जातकस्य जन्मपत्र्यां लग्नतः द्वादशभाव पर्यन्तं ये-ये ग्रहाः यत्रस्थिताः तेषां अनुसारेणैव कर्मविपकादि फलकथनं कृतमितम्। यत्रकुत्रा..पि परस्परग्रहाभावे..पि फलादि कथनं जातम्।

**वैशिष्ट्यम् -**

फलकथने अत्र वैशिष्ट्यमिदं यत् जातकस्य पूर्वजन्माश्रितं फलं निगदिदं तेन। ज्योतिष ग्रन्थेषु प्रायेण कर्मविपाकादिफलम् सर्वत्र सहजरूपेण नैव प्राप्यते। ये जोतिर्विदः सन्ति ते जन्मांकचक्राधारेणैव येनकेन प्रकारेण फलं वदन्ति किन्तु अस्मिन् प्रकरणे स्वातन्त्रेण मनुषस्य कर्मविपाकादि दोषद्वारा सम्प्रति जीवने यानिविघ्नानि भूतानि तेषां विघ्नानां दोषादिनां च विवरणं निराकरणं परिहारश्च निसेवितम् अत्र।

**३. मेषादि द्वादशलग्नानां फलकथनम् -**

तृतीय प्रकरण रूपेण इदं प्रकरणं स्वीकृतमिति।अत्र एकोन षष्ठ्यधिक शतत्रयम् श्लोकसंख्या वर्तते। अस्मिन् प्रकरणे प्रायेण अनुष्टुपछन्दसा वर्णनं कृतमिति यत्रतत्र, गुरुलघ्वादिनां स्खलनं दरिदृश्यते। तथा च आरोहा अवरोहे नैव वैशिष्ट्यम् उपलब्धे च। मात्रिक्छन्द दृष्ट्या..पि, मात्रादिनांमपि उल्लंघनं कृतम् हस्तलेखकेन। न जाने पूर्ववर्ति प्रतिषु केनविधिना संयोजनं कृतमासीत्। किन्तु सम्प्रति या प्रतिरूप्लब्धा वर्तते तत्र छन्दोभंगस्य त्रुटिः प्रायेण पदे-पदे प्राप्यते।

**वर्णितविषयः -**

अत्र मेषादि द्वादशलग्नानां फलकथनम् वर्तते। अनेनसह इहजन्मनः फलमपि लिखितम्। तथा च मनुष्यकृतकर्मप्रायश्चितानामपि वर्णनं अत्र विशेष रूपेण प्राप्यते। अन्य ज्योतिष ग्रन्थेषु लग्नफलेषु च साम्प्रतिकं फलं प्राप्यते। किन्तु अत्र पूर्वजन्मकृतं पापं यदस्ति तत् किं फलं भवेत् इत्यपि विशेषरूपेण निर्दिष्टं अत्र।

**वैशिष्ट्यम् -**

ज्योतिष ग्रन्थेषु प्रायेण इहजन्मनः फलकथनं एव प्राप्यते। यथा मानसागरी, सारावली, फलदीपिका इत्यादि ग्रन्थेषु इह जन्मनः मेषादिद्वादशलग्नानां फलकथनं प्राप्तं भवति। किन्तु ज्ञान भास्करोक्त मेषादि द्वादश लग्नानां फलकथनं प्रकरणेन पूर्वजन्मकर्मणः तथा च तस्य कर्मणः अस्यजन्मस्य फलं तथा च तस्य प्रायश्चिता वर्णनं अत्र उपलभ्यते। इदमेव अस्य वैशिष्ट्यम्। यत् अन्यग्रन्थेषु नैव उपलभ्यते।

## ४. चतुर्थोऽध्यायः (प्रकरणत्रयस्य सामान्यनिरूपणम्)

(१) ज्योतिषे वर्गनिरूपणम्।

(२) षड्वर्गस्य वैशिष्ट्यम्

(३) मेषादिद्वादशलग्नानाम् निरूपणम्